● **षष्ठः पाठः**

# परमहंसः रामकृष्णः

**(रामकृष्ण परमहंस)**

*इस पाठ में परम सिद्ध महात्मा स्वामी रामकृष्ण के तपः पूत सिद्धि प्रदर्शन से विमुक्त चरित्र का निरूपण किया गया है। सिद्धि साधना के लिए होती है न कि प्रदर्शन के लिए। इस स्वरूप के मूर्त रूप परमहंस का मानना था कि जन कल्याण ही मानव का उत्कृष्ट धर्म है एवं दुःखी लोगों की सेवा करना ही ईश्वर की परम उपासना है।*

रामकृष्णः एकः विलक्षणः महापुरुषः अभवत्। तस्य विषये महात्मना गान्धिना उक्तम्—

''परमहंसस्य रामकृष्णस्य जीवनचरितं धर्माचरणस्य प्रायोगिकं विवरणं विद्यते। तस्य जीवनम् अस्मभ्यम् ईश्वरदर्शनाय शक्तिं प्रददाति। तस्य वचनानि न केवलं कस्यचित् नीरसानि ज्ञानवचनानि अपितु तस्य जीवन-ग्रन्थस्य पृष्ठानि एव। तस्य जीवनम् अहिंसायाः मूर्तिमान् पाठः विद्यते।''

स्वामिनः रामकृष्णस्य जन्म बंगेषु हुगलीप्रदेशस्य कामारपुकुरस्थाने १८३६ ख्रिस्ताब्दे अभवत्। तस्य पितरौ परमधार्मिकौ आस्ताम्। बाल्यकालादेव रामकृष्णः अद्भुतं चरित्रम् अदर्शयत्। तदानीमेव ईश्वरे तस्य सहजा निष्ठा अजायत्। ईश्वरस्य आराधनावसरे स सहजे समाधौ अतिष्ठत्।

परमसिद्धोऽपि सः सिद्धीनां प्रदर्शनं नोचितम् अमन्यत्। एकदा केनचित् भक्तेन कस्यचित् महिमा एवं वर्णितः, ''असौ महात्मा पादुकाभ्यां नदीं तरति, इति महतो विस्मयस्य विषयः।'' परमहंसः रामकृष्णः मन्दम् अहसत् अवदत् च ''अस्याः सिद्धेः मूल्यं पणद्वयमात्रम्, पणद्वयेन नौकया सामान्यो जनः नदीं तरति। अनया सिद्धया केवलं पणद्वयस्य लाभो भवति। किं प्रयोजनम् एतादृश्याः सिद्धेः प्रदर्शनेन।''

रामकृष्णस्य विषये एवंविधा बहवः कथानकाः प्रसिद्धाः सन्ति। आजीवनं सः आत्मचिन्तने निरतः आसीत्। अस्मिन् विषये तस्य अनेके अनुभवाः लोके प्रसिद्धाः।

तस्य एव वचनेषु तस्य अध्यात्मानुभवाः वर्णिताः–

(१) ''जले निमज्जिताः प्राणाः यथा निष्क्रमितुम् आकुलाः भवन्ति तथैव चेत् ईश्वर–दर्शनाय अपि समुत्सुकाः भवन्तु जनाः तदा तस्य दर्शनं भवितुम् अर्हति।''

(२) ''किमपि साधनं साधयितुं मत्कृते दिनत्रयाधिकः कालः नैव अपेक्ष्यते।''

(३) ''नाहं वाञ्छामि भौतिकसुखप्रदां विद्याम्, अहं तु तां विद्यां वाञ्छामि यथा हृदये ज्ञानस्य उदयो भवति।''

अयं महापुरुषः स्वकीयेन योगाभ्यासबलेनैव एतावान् महान् सञ्जातः। स ईदृशः विवेकी शुद्धचित्तश्च आसीत् यत् तस्य कृते मानवकृताः विभेदाः निर्मूलाः अजायन्त। स्वकीयेन आचारेण एव तेन सर्वं साधितम्।

विश्वविश्रुत: स्वामी विवेकानन्द: अस्यैव महाभागस्य शिष्य: आसीत्। तेन न केवलं भारतवर्षे अपितु पाश्चात्यदेशेष्वपि व्यापकस्य मानवधर्मस्य डिण्डिमघोष: कृत:। तेन अन्यैश्च शिष्यै: जनानां कल्याणार्थं स स्थाने-स्थाने रामकृष्णसेवाश्रमा: स्थापिता:। ईश्वरानुभव: दु:खितानां जनानां सेवया पुष्यति, इति रामकृष्णस्य महान् सन्देश:।

# अभ्यास प्रश्न

## • लघु उत्तरीय प्रश्न

**निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए–**

१. स्वामिन: रामकृष्णस्य जन्म कुत्र कदा च अभवत्?

२. रामकृष्ण: परमहंस: कीदृश: पुरुष: आसीत्?

३. कस्य जीवनचरित धर्माचरणस्य प्रायोगिकं विवरणं विद्यते?

४. रामकृष्णस्य पितरौ कीदृशौ आस्ताम्?

५. एकदा भक्तेन कस्यचित् किं महिमा वर्णित:?

६. रामकृष्ण: कथं महान सञ्जात:?

७. स्वामी विवेकानन्द: कस्य शिष्य: आसीत्?

८. रामकृष्णस्य विषये महात्मा गान्धिन: किम् उक्तम्?

९. रामकृष्णस्य क: महान् संदेश:?

१०. रामकृष्ण सेवाश्रमा: केन स्थापिता:?

११. ईश्वरानुभव: केषां जनानां सेवया पुष्यति?

## • अनुवादात्मक प्रश्न

**(१) निम्नलिखित अवतरणों का ससन्दर्भ हिन्दी में अनुवाद कीजिए–**

(अ) परमहंसस्य ........................................ पाठ: विद्यते।

(ब) स्वामिन: रामकृष्णस्य ....................................अतिष्ठत्।

(स) परमसिद्धोऽपि ..............................................प्रदर्शनेन।

(द) रामकृष्णस्य विषये ...................................उदयो भवति।

(य) विश्वविश्रुत: ..........................................महान सन्देश:।

**(२) निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(अ) रामकृष्ण एक विलक्षण महापुरुष थे।

(ब) उनका जन्म बंगाल में हुआ था।

(स) वे सभी से स्नेह करते थे।

(द) मैं भौतिक सुख नहीं चाहता हूँ।

(य) रामकृष्ण बड़े महात्मा थे।

(र) उनके माता-पिता धार्मिक थे।

## ● व्याकरणात्मक प्रश्न

**(१) निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए–**
धर्माचरण, नोचितम्, आराधनावसरे, बलेनैव, योगाभ्यास, सेवाश्रमा:।

**(२) निम्नलिखित शब्दों में समास-विग्रह कीजिए एवं समास का नाम लिखिए–**
रामलक्ष्मणौ, रात-दिन, पितरौ।

**(३) निम्नलिखित शब्द-रूपों में विभक्ति एवं वचन लिखिए–**
परमहंसस्य, बंगेषु, ईश्वरे, जनानां।

**(४) निम्नलिखित शब्दों में उपसर्ग अथवा प्रत्यय लिखिए–**
मूर्तिमान, आजीवन, विलक्षण:।

## ● आन्तरिक मूल्यांकन

१. रामकृष्ण परमहंस के जीवन की प्रमुख घटनाओं पर पोस्टर तैयार कीजिए।

२. किसी अन्य महापुरुष के बारे में एक निबन्ध लिखिए, जैसे–स्वामी विवेकानन्द।

## शब्दार्थ

**विलक्षण:** = अलौकिक। **उक्तम्** = कहा था। **प्रायोगिकम्** = व्यवहार में लाया हुआ। **मूर्तिमान्** = साकार। **पादुकाभ्यां** = दो खड़ाऊँओं से। **पण** = पुराने समय का सिक्का। **बंगेषु** = बंगाल प्रदेश। **ख्रिस्ताब्दे** = ईसवी सन् में। **सहजा** = स्वाभाविक। **निष्ठा** = विश्वास। **आराधनावसरे** = ईश्वर की आराधना के समय। **नोचितम्** = उचित नहीं है। **एतादृश्या:** = इस प्रकार की। **निरत:** = शामिल। **निमज्जिता:** = डूबे हुए। **निष्क्रमितुम् आकुला:** = बाहर निकलने के लिए व्याकुल। **मत्कृते** = मेरे लिए। **अपेक्ष्यते** = आवश्यक है। **सुखप्रदाम्** = सुख देनेवाली। **मानवकृता:** = मानव द्वारा निर्मित। **निर्मूला:** = बेकार। **महाभागस्य** = महानुभाव के। **बलेनैव** = बल से ही। **विश्वविश्रुत:** = विश्व भर में प्रसिद्ध। **डिण्डिमघोष:** = उच्च स्तर में उद्घोषणा, ढिंढोरा पीटना। **जनानाम्** = मनुष्यों के। **ईश्वरानुभव:** = ईश्वर का अनुभव। **पुष्यति** = पोषित होता है। **इति** = ऐसा।

●